वेदांत

क्र. ७४

2451

# शंकराचार्य- अपरोक्षानुभूति

४६४।७

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1.)

श्रीगणेशायनमः।श्रीगुरुभ्योनमः।श्रीहरिंपरमानंदमुप
देष्टारमीश्वरं।व्यापकंसर्वलोकानांकारणंतंनमाम्यहं।१।
अपरोक्षानुभूतिर्वैप्रोच्यतेमोक्षसिद्धये।सद्भिरेवप्र
यत्नेनवीक्षणीयामुहुर्मुहुः।२।स्ववर्णाश्रमधर्मेणत
पसाहरितोषणात्।साधनंप्रभवेत्पुंसांवैराग्यादिच
तुष्टयं।३।ब्रह्मादिस्थावरांतेषुवैराग्यंविषयेष्वनु।यथै
वकाकविष्टायांवैराग्यंतद्धिनिर्मलं।४।नित्यमात्मस्व
रूपंहिदृश्यंतद्विपरीतकं।एवंयोनिश्चयःसम्यग्वि
वेकोवस्तुनःसवै।५।सदैववासनात्यागःशमोयमिति
शब्दितः।निग्रहोबाह्यवृत्तीनांदमइत्यभिधीयते।६।

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(२)

विषयेभ्यःपरावृत्तिःपरमोपरतिर्हिसा।सहनंसर्वदुः
खानांतितिक्षासाशुभामता।७।संसारबंधनिर्मुक्तिःकं
थंस्यान्मेकदाविधे।इतियासुदृढाबुद्धिर्वक्तव्यासा
मुमुक्षुता।८।निगमाचार्यवाक्येषुभक्तिःश्रद्धेतिवि
श्रुता।चित्तैकाग्र्यंतुसल्लक्ष्येसमाधानमितिस्मृतं।९।
उक्तसाधनयुक्तेनविचारःपुरुषेणहि।कर्त्तव्योज्ञा
नसिध्यर्थमात्मनःशुभमिच्छता।१०।कोहंकथमिदं
जातंकोवैकर्त्तास्यविद्यते।उपादानंकिमस्तीहवि
चारःसोयमीदृशः।११।नोत्पद्यतेविनाज्ञानंविचारे नं २
णान्यसाधनैः।यथापदार्थभानंहिप्रकाशेनविना ॥३॥

A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai

(2A)

क्वचित्॥१२॥नाहंभूतगणोदेहोनाहंचाक्षगणास्त

था।एतद्विलक्षणःकश्चिद्विचारःसोयमीश्वरः॥१३॥अ ह

नै३ ज्ञानान्नाश्रवंसर्वज्ञानेनैवविलीयते।संकल्पोविविधः

कर्त्तीविचा०॥१४॥एतयोपायेतुपादानेमकेंस्तक्ष्मंसद

व्ययं।यथैवमहंकारादीनांवि०॥१५॥अहमेकोपिसूक्ष्म

सा. श्चज्ञातोस्मिसदव्ययः।तदहंनाश्रसंदेहोवि०॥१६॥

आत्माविनिश्चलोलोकोदेहोबहुभिरावृतः।तयो

रैक्यंप्रपश्यंतिकिमज्ञानमतःपरं॥१७॥आत्मानि

यामकश्चांतर्देहोनियम्यबाह्यकः।तयोरैक्यं०॥१८॥

आत्माज्ञानमयःपुण्योदेहोमांसमयोऽशुचिः।तयो

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

रैक्यं ०।१९। आत्माप्रकाशकःस्वच्छोदेहस्तामसउच्यते।
तयोरैक्यं ०।२०। आत्मानित्योहिसद्रूपोदेहोऽनित्यो
ह्यसन्मयः। तयोरैक्यं ०।२१। आत्मनस्तत्प्रकाशत्वं
यत्पदार्थावभासनं। नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यांध्यं
यथानिशि।२२। देहोऽहमित्ययंमूढो धृत्वातिष्ठत्यो
होजनः। ममायमित्यपिज्ञात्वा घटद्रष्टेवसर्वदा।२३।
ब्रह्मैवाहंसमःशांतःसच्चिदानंदलक्षणः। नाहंदेहो
ह्यसद्रूपोज्ञानमित्युच्यतेबुधैः।२४। निर्विकारो
निराकारोनिरवद्योहमव्ययः। नाहंदेहो ०।२५। निरा ॥२॥
मयोनिराभासोनिर्विकल्पोहमाततः। नाहंदेहो ०।२६।

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project of the

(3A) निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोहमच्युतः। नाहं दे०॥२७॥
निर्मलो निश्चलो नंतः शुद्धोहमजरामरः। नाहं
देहो०॥२८॥ स्वदेहं शोभनं त्यक्त्वा पुरुषाख्यं च संमे
तं। किं मूर्खशून्यमात्मानं देहातीतं करोषि भो॥२९॥
स्वात्मानं शृणु मूर्ख त्वं श्रुत्यायुक्त्या च पौरुषं दे
हातीतं सदाकारं सुदुर्दर्शं भवादृशैः॥३०॥ अहं श
ब्देन विख्यातो एक एव स्थितः परः। स्थूलस्त्वने
कतां प्राप्तः कथं स्याद्देहकः पुमान्॥३१॥ अहं द्रष्ट
तया शुद्धो देहो दृश्यतया स्थितः। ममायमिति निर्दे
श्यात्कथं स्या०॥३२॥ अहं विकारहीनस्तु देहो नित्य

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५) विकारवान्।इतिप्रतीयतेसाक्षात्कथं।३३।यस्मात्पर
मितिश्चेत्स्यात्तथापुरुषलक्षणं।विनिर्णितोविमर्देनक
९२ थं।३४।सर्वंपुरुषएवेतिसूक्तेपुरुषसंज्ञके।अप्यु
च्यतेयतःश्रुत्वाकथं।३५।तत्रैवचसमाख्यातःस्व
यंज्योतिर्हिपूरुषः।अ[illegible]त्रकात्र्येयायंकथंस्या।३६।
असंगःपुरुषःप्रोक्तोबृहदारण्यकेपिच।अचलोऽप
मलोऽश्लिष्टःकथंस्या।३७।प्रोक्तोपिकर्मकांडेनह्या
त्मादेहाद्विलक्षणः।नित्यश्चतत्फलंभुंक्तेदेहपातादनं
तरं।३८।लिंगंचानेकसंयुक्तंचलंदृश्यंविकारिच।अव्या कार२
पकमसद्रूपंतत्कथंस्यात्पुमानयं।३९।एवंदेहद्वयाद ॥३॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

न्यश्चात्मा पुरुष ईश्वरः। सर्वात्मा सर्वरूपश्च सर्वातीतो
ऽहमव्ययः॥४०॥ इत्यात्मदेहभोगेन प्रपंचस्यैव सत्यता।
यथोक्ततर्कशास्त्रेण किं ततः पुरुषार्थता॥४१॥ इत्यात्म
देहभेदेन देहात्मत्वं निराकृतं। इदानीं देहभेदेन ह्यस
त्वं स्फुटमुच्यते॥४२॥ चैतन्यस्यैकरूपत्वाद्भेदो युक्तो
न कर्हिचित्। जीवत्वं च मृषा ज्ञेयं रज्ज्वां सर्पभ्रमो य
था॥४३॥ रज्ज्वज्ञानात् क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी।
भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला॥४४॥ उ
पादानं प्रपंचस्य ब्रह्मणोन्यन्न विद्यते। तस्मात्सर्वप्र
पंचोयं ब्रह्मैवास्ति न चेतरत्॥४५॥ व्याप्यव्यापकता

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

मिथ्यासर्वमात्मेतिज्ञात्वासनात्।इतिज्ञातेपरेतत्त्वेष्वे
दस्यावसरःकुतः।४६।कस्यापिनिवारितंतन्नंनाना
त्वंस्वसुखेनहि।कथंभासोभवेदन्यःस्थितेचोद्भयका
रणे।४७।दोषोपिविहितःकस्याभस्योर्भस्यंसगच्छ
ति।इहपश्यतिनानात्वंमाययावंचितोनरः।४८।
ब्रह्मणःसर्वभूतानिजायंतेपरमात्मनः।तस्मात्ये
तानिब्रह्मैवभवंतीत्यवधारयेत्।४९।ब्रह्मैवसर्व
नामानिरूपाणिविविधानिच।कर्माण्यपिसमग्रा
णिबिभर्तीतिश्रुतिर्जगौ।५०।स्ववर्णाज्जायमा ॥४॥
नस्यसुवर्णत्वंयथाभवेत्।ब्रह्मणोजायमानस्य

(5A)

अस्तत्वंचनथाभवेत्॥५१॥स्वल्पमप्यंतरंकृत्वाजीवा
त्मापरमात्मनोः॥यःसंतिष्ठतिमूढात्माभयंतस्या
पिभाषितं॥५२॥यथाज्ञानाद्भवेद्द्वैतमितरस्तत्रपश्य
ति॥आत्मत्वेनयदासर्वंनेतरस्तत्रचाण्वपि॥५३॥यस्मि
न्सर्वाणिभूतानिह्यात्मत्वेनविजानतः॥नवैतस्य
भवेन्मोहोनचशोकोद्वितीयतः॥५४॥अयमात्माहि
ब्रह्मैवसर्वात्मकतयास्थितः॥इतिनिर्धारितंश्रुत्या
बृहदारण्यकसंस्थया॥५५॥अनुभूतोप्ययंलोकोव्य
वहारक्षमोपिसन्॥असद्रूपोयथास्वप्नउत्तरक्षणबा
धितः॥५६॥स्वप्नंजागरितंनास्तिस्वप्नजागरितेनहि॥

Digitization project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

द्वयमेवलयेनास्तिलयोपिह्युभयोर्नहि।५७।त्रयमेवं
भवेन्मिथ्यागुणत्रयविनिर्मितं।अस्यद्रष्टागुणाती
तो नित्योह्येकश्चिदात्मकः।५८।यद्वन्मृदिघटभ्रां
तिःशुक्तौवारजतःस्थितिः।तद्वद्ब्रह्मणिजीवत्वंवी
क्ष्यमाणेननश्यति।५९।यथामृदिघटोनामकन
दी केकुंडलाभिधा।शुक्तौवारजतख्यातिर्जीवश
ब्दस्तथापरे।६०।यथैवव्योम्निवेतालोगंधर्वाणांपुरंय
था।यथाकाशेद्विचंद्रत्वंतद्वत्सत्येजगस्थितिः।६१।
यथैवव्योम्निनीलत्वंयथानीरंमरुस्थले।पुरुषत्वं ॥५॥
यथास्थाणौतद्वद्विश्वंचिदात्मनि।६२।यथातरंगक

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6P)

ल्लोलैर्जलमेवस्फुरत्यलं।पात्ररूपेणताम्रंहिब्रह्मां
डौघैस्तथात्मता।६३।घटनाम्नायथापृथ्वीपटनाम्ना
हितंतवः।जगन्नाम्नाचिदाभातिज्ञेयंतत्तदभाव
तः।६४।सर्वोपिव्यवहारस्तुब्रह्मणाक्रियतेजनैः।
अज्ञानान्नविजानंतिमृदेवहिघटादिकं।६५।का
र्यकारणतानित्यमास्तेघटमृदोर्यथा।तथैवश्रुति
युक्तिभ्यांप्रपंचब्रह्मणोरिह।६६।गृह्यमाणेघटे
यद्वन्मृत्तिकायातिवैबलात्।वीक्ष्यमाणेप्रपंचेपि
ब्रह्मैवाभातिभास्करं।६७।सदैवात्माविशुद्धोस्तिह्य
शुद्धोभातिवैसदा।यथैवद्विविधारज्जुज्ञानिनोऽ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

त्तानिनोनिश्चि।।६८।।यथैवमृन्मयःकुंभस्तद्वद्देहोपिचि
न्मयः।।आत्मानात्मविभागोयंवृथैवक्रियतेबुधैः।।६९।।
सर्पत्वेनयथारज्जुरजतत्वेनशुक्तिका।।विनिर्णीता
विमूढेनदेहत्वेनदेहत्वेनतथात्मता।।७०।।घटत्वेन
यथापृथ्वीपटत्वेनैवतंतवः।।विनिर्णी०।।७१।।कनकेकुं
डलत्वेन~~क्ष्म~~जलत्वेनमरीचिका।।विनिर्णी०।।७२।।गृह
त्वेन~~मसिचिका~~हिकाष्ठानिखड्गत्वेनैवलोहता।।विनि
र्णीता०।।७३।।यथावृक्षविपर्यासोजलाद्भवतिकर्हिचि
त्।।तद्वदात्मनिदेहत्वंपश्यत्यज्ञानयोगतः।।७४।।पोते
नगच्छतःपुंसःसर्वंभातीवचंचलं।।तद्वदात्म०।।७५।।पी ।।६।।
तत्वंहियथाशुभ्रेदोषाद्भवतिकस्यचित्।।तद्वदात्म

(7A)

निर्देहत्वं॥७६॥चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमा
त्मकं॥तद्व०॥७७॥आलातं भ्रमणेनैव वर्तुलं भाति सूर्यव
त्॥तद्व०॥७८॥महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः॥तद्व
दा०॥७९॥सूक्ष्मत्वं सर्वभावानां स्थूलत्वं चोपनेत्रतः॥त
द्व०॥८०॥काचभूमौ जलत्वं वा जलभूमौ हि काचता॥त
द्वदात्मनि०॥८१॥यद्वदग्नौ मणित्वं हि मणौ वा वन्हितां
पुमान्॥तद्व०॥८२॥पथे चादा विपर्यासो मोहाद्भवति क
स्यचित्॥तद्वदात्मनि देहत्वं॥८३॥अभ्रेषु सत्सु धावत्सु
धावन्निव यथा शशी॥तद्व०॥८४॥यथाश्वाशीघ्रजत्वेप्सा
तिश्चंचलत्वेन कस्यचित्॥तद्व०॥८५॥एवमात्मन्यवि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ज्ञाते देहाभ्यासोपि जायेते। सएवास्मौरि ज्ञानाल्लीय
ते परमात्मनि। ८६। सर्वमात्मतया ज्ञातं जगत्स्थाव
रजंगमं। अभावात्सर्वभावानां देहानां चात्मता कु
तः। ८७। आत्मानं सततं ज्ञात्वा कालं नय महाद्युते।
प्रारब्धमखिलं भुंजन्नोद्वेगं कर्तुमर्हसि। ८८। उत्प
न्नेप्यात्मविज्ञाने प्रारब्धं नैव मुंचति। इति यच्छ्रूय
ते शास्त्रान्निराक्रियतेधुना। ८९। तत्वज्ञानोद
यादूर्ध्वं प्रारब्धं नैव विद्यते। देहादीनामसत्वात्तु य
था स्वप्नो विबोधतः॥ ९०। कर्मजन्मांतरीयं यत्प्रारब्ध ॥७॥
मिति कीर्तितं। तत्तु जन्मांतराभावात्पुंसो नैवास्तिक

Joint property of the Rajawade Sanshodhak Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8A)

हिं चित्त ।९१। स्वप्नदेहोयथाधस्तस्तथैवायंहिदेहकः।
अध्यस्तस्यकुतोजन्म जन्माभावेस्थितिःकुतः।९२।
उपादानंप्रपंचस्यमृद्भांडस्यैवपश्यति।अज्ञानंचे
तिवेदांतैस्तस्मिन्नष्टेक्वविश्वता।९३।यथारज्जुंप
रित्यज्यसर्पंगृह्णातिवैभ्रमात्।तद्वत्सत्यमविज्ञाय
जगत्पश्यतिमूढधीः।९४।रज्जुरूपेपरिज्ञातेस
र्पखंडंनतिष्ठति।अधिष्ठानेतथाज्ञातेप्रपंचेशून्य
तांगते।९५।देहस्यापिप्रपंचत्वात्प्रारब्धावस्थितः
कुतः।अज्ञानजनबोधार्थंप्रारब्धंवक्तिवैश्रुतिः।९६।
क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे।बहुत्वं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(१) तान्निषेधार्थंश्रुत्यागीतंचैवस्फुटं।९७।उच्यतेज्ञैर्वि
ज्ञाश्चैतत्तदानर्थद्वयागमः।वेदांतमतहानिंच्चयुतो
ज्ञानमितिश्रुतिः।९८।त्रिपंचगान्यपोवक्ष्येपूर्वो
क्तस्यैवलब्धये।तैःसर्वैःसर्वदाकार्यंनिदिध्यासन
मेवच।९९।नित्याभ्याससादृतेप्राप्तिर्नभवेत्सच्चिदात्म
नः।तस्माद्ब्रह्मनिदिध्यासेज्जिज्ञासुःश्रेयसेचिरं।१००।
यमोहिनियमस्त्यागोमौनंदेशश्चकालतः।आसनं
मूलबंधश्चदेहसाम्यंचदृक्स्थितिः।१।प्राणसंय
मनंचैवप्रत्याहारश्चधारणा।आत्मध्यानंसमा ॥८॥
धिश्चप्रोक्तान्यंगानिवैक्रमात्।२।सर्वंब्रह्मेतिवैज्ञा

(9A)

नादिंद्रियग्रामसंयमः।यमोयमितिसंप्रोक्तोऽभ्यासनी
योमुहुर्मुहुः।३।सजातीयप्रवाहश्चविजातीयतिर
स्कृतिः।नियमोहिपरानंदोनियमात्क्रियतेबुधैः।४
त्यागःप्रपंचरूपस्यविदात्मत्वावलोकनात्।त्यागोहि
महतांपूज्यःसद्योमोक्षमयोयतः।५।यस्माद्वाचोनि
वर्तंतेअप्राप्यमनसासह।यन्मौनंयोगिभिर्गम्यं
तद्भवेत्सर्वदाबुधैः।६।वाचोयस्मान्निवर्त्तंतेतद्वक्तुं
केनशक्यते।प्रपंचोयदिवक्तव्यःसोपिशब्दविवर्जि
तः।७।इतिवातद्भवेन्मौनंसतांसहजसंज्ञितं।गि
रामौनंहिबालानांप्रयुक्तंब्रह्मवादिभिः।८।आदावे

(10) तेचमध्येचजनोयस्मिन्नविद्यते।येनेदंसततंव्या
प्तंसदेशोविज्ञनस्मृतः।९।कालात्वात्सर्वभूतानां
ब्रह्मादीनांनिमेषतः।कालशब्देननिर्दिष्टोह्यखंडो
नंदअद्वयः।१०।सएवैनैवभवेद्यस्मिन्नजस्रंब्रह्म
चिंतनं।आसनंतद्विजानीयान्नेतरत्सुखनाशकं।११।
सिद्धंयत्सर्वभूतादिविश्वाधिष्ठानमव्ययं।यस्मिन्सि
द्धाःसमाविष्टास्तद्वैसिद्धासनंभवेत्।१२।यन्मूलं
सर्वलोकानांयन्मूलंचित्तबंधनं।मूलबंधःसदा
सेव्यायोगोसौराजयोगिनां।१३।अंगानांसमतां ।।१९।।
विद्यात्समेब्रह्मणिलीयते।नोचेन्नैवसमानत्वमृजु

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10A) त्वंशुष्ककाष्टवत्॥११५॥दृष्टिंज्ञानमयींकृत्वापश्येद्ब्रह्म
मयंजगत्।सादृष्टिःपरमोदारानननासाग्रविलोकिनी
॥११६॥द्रष्टादर्शनदृश्यानांविरामोयत्रवाभवेत्।दृष्टिस्त
त्रैवकर्त्तव्यानननासाग्रविलोकिनी॥११७॥चित्तादिसर्वभा
वेषुब्रह्मत्वेनैवभावनात्।निरोधःसर्ववृत्तीनांप्राणा
यामःसउच्यते॥११८॥निरोधनप्रपंचस्यरेचकाख्यः
समीरणः।ब्रह्मैवास्मीतियावृत्तिःपूरकोवायुरीरि
तः॥११९॥ततःसद्वृत्तिनैश्चल्यंकुंभकःप्राणसंयमः।
अयंचापिप्रबुद्धानांअज्ञानांघ्राणपीडनात्॥१२०
विषयेष्वात्मतांदृष्ट्वामनसश्चित्तमज्जनं।प्रत्याहा

(11)

रः सविज्ञेयोभ्यसनीयोमुमुक्षुभिः॥२०॥यत्रय ग

त्रमनोयातिब्रह्मणस्तत्रदर्शनात्॥मनसोधारणं

चैवधारणासापरामता॥२१॥ब्रह्मैवास्मीतिसद्वृत्त्या

निरालंबतयास्थितिः॥ध्यानशब्देनविख्यातापरमा

नंददायिनी॥२२॥निर्विकारतयावृत्त्याब्रह्माकारत

यापुनः॥वृत्तिविस्मरणंसम्यक्समाधिर्ज्ञानसंज्ञकः॥२३॥

इमंचाकृत्रिमानंदंतावत्साधुःसमभ्यसेत्॥वश्योया

वत्क्षणात्पुंसोप्रयुक्तःसंभवेत्स्वयं॥२४॥ततःसा

धननिर्मुक्तोसिद्धोभवतियोगिराट्॥तत्स्वरूपंनवै ॥१०॥

तस्यविषयोमनसोगिरां॥२५॥समाधौक्रियमाणेतुवि

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(11A)

घ्नान्यायांति वैबलात् । अनुसंधानराहित्यमालस्यंभो
गलालसं ।२६। भयंतमश्चविक्षेपस्तेजस्यंवृश्यमन्यता ॥
एवंयद्विघ्नबाहुल्यंत्याज्यंब्रह्मविदाच्छनैः ।२७। भाववृ
त्त्याहिभावत्वंशून्यवृत्त्याहिशून्यता । ब्रह्मवृत्त्याहिपूर्ण
त्वंतथापूर्णत्वमभ्यसेत् ।२८। येहिवृत्तिंविहायैनांब्रह्मा
ख्यांपावनींपरां । तेतुवृथैवजीवंतिपशुभिश्चसमा
नराः ।२९। येतुवृत्तिंविजानंतिज्ञात्वापिवर्धयंतिये । ते
वैसत्पुरुषाधन्यावंद्यास्तेभुवनत्रये ।३०। एषांवृत्तिःस
मावृद्धापरिपक्वाचसापुनः । तेवैसद्ब्रह्मतांप्राप्तानेतरे
शब्दवादिनः ।३१। कुशलाब्रह्मवार्त्तायांवृत्तिहीनाःसु

the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai Joint project of

(12)

रागिणः।तेप्यज्ञानतमान्नूनंपुनरायांतियांतिच।३२।
ति२ निमेषार्धंनतिष्ठंतिवृत्तिंब्रह्ममयींविना।यथातिष्ठंति
ब्रह्माद्याःसनकाद्याःशुकादयः।३३।कार्यकारणतायाता
कारणेनहिकार्यता।कारणत्वंततोनश्येत्कार्याभावेवि
चारतः।३४।अथशुद्धंभवेद्वस्तुयद्वैवाचामगोचरं।द्र
ष्टव्यंमृद्घटेनैवदृष्टांतेनपुनःपुनः।३५।अनेनैवप्र
कारेणवृत्तिर्ब्रह्मात्मिकाभवेत्।उदेतिशुद्धचित्तानां
वृत्तिज्ञानंततःपरं।३६।कारणंव्यतिरेकेणपुमानादौ
विलोकयेत्।अन्वयेनपुनस्तद्धिकार्येनित्यंप्रपश्यति।३७
कार्येहिकारणंपश्येत्पश्चात्कार्यंविवर्जयेत्।कारणत्वंस्व ॥११॥
तोगच्छेदवशिष्टंभवेन्मुनिः।३८।भावितंतीव्रवेगेनय

Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(12A)

द्रस्तुनिश्चयात्मना।तुमांस्तद्भिभवेच्छीघ्रंज्ञेयंभ्रमरकीट
वत्॥१३९॥अदृश्यंभावरूपंचसर्वमेतच्चिदात्मकं।सावधा
नतयानित्यंस्वात्मानंभावयेद्बुधः॥१४०॥दृश्यंह्यदृश्यंसमा
नित्वाब्रह्माकारेणचिंतयेत्।विद्वान्नित्यसुखेतिष्ठेद्धि
याचिद्रसपूर्णया॥१४१॥एभिरंगैःसमायुक्तोराजयोगउ
दाहृतः।किंचित्पक्वकषायाणांहठयोगेनसंयुतः॥१४२॥
परिपक्वंमनोयेषांकेवलोयंचसिद्धिदः।गुरुदैवतभक्ता
नांसर्वेषांसुलभोजवात्॥१४३॥ ॥ छ॥ छ॥ छ
इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकराचार्यविरचित
मपरोक्षानुभूतिःसमाप्तः।कोरान्योपनामकआत्मारामेणलिखितं।

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com